क्र० – ४१

परि० सं० – 1998

श्यामा रहस्य – शिवावलि विधान

36 – पूर्ण – तन्त्र

श्रीगणेशगुरुभ्यो नमः अथ षडंगं ॥ ओं नमः नाभ्यादिपादद्वयान्तं । ह्रीं नमो हृदयादिनाभ्यंतं । क्रों नमो मूर्द्धादिहृदयांतं ।
यं त्वगात्मनेनम हृदयकमलमध्ये । रं असृगात्मनेनमः । पूर्वदले । लं मांसात्मनेनमः पश्चिमदले । वं मेदात्मने अग्नेयदले । शं अ॥
स्थ्यात्मनेनमः वायव्यदले । षं मज्जात्मनेनमः ईशानदले । सं शुक्रात्मनेनमः निर्ऋतिदले । हं प्राणात्मनेनमः उत्तरदले । लं जीवा
त्मनेनमः दक्षिणदले । क्षं परमात्मनेनमः पुनः कर्णिकायामिति न्यसेत् । अथ ध्यानम् ॥ रक्ताब्धिपोतारुणपद्मसंस्थां पाशां
कुशौ विक्षुशरासबाणान् । शूलं कपालं दधतीं कराब्जै रक्तां त्रिनेत्रां प्रणमामि देवीं ॥ इति ध्यात्वा हृदि हस्तं लेलिह्य मुद्रया निधाय
श्रीं श्रीं ह्रीं क्रों यं रं लं वं शं षं सं हं लं क्षं हंसः सोहं ममजीव इह स्थितः ॐ श्रीं ह्रीं क्रों यं १५ ममसर्वेन्द्रियाणि । ॐ श्रीं ह्रीं क्रों श्रीं ह्रीं १५
निजवपुज्योतिम यं ध्यायेदिति प्राणप्रतिष्ठाविधिः ॥ अस्य श्रीदक्षिणकालिकामंत्रस्य भैरवऋषिः । उष्णिक् छंदः श्री
दक्षिणकालिका देवता ह्रीं बीजं हूं शक्तिः क्रीं कीलकं । ममाभीष्टसिध्यर्थे जपे विनियोगः इति कृतांजलिः । भैरवऋषये नमः शिर
सि । उष्णिक्छंदसे नमः । मुखे । श्रीदक्षिणकालिकादेव्ये नमः हृदये ॥ ह्रीं बीजाय नमो गुह्ये हूं शक्तये नमः पादयोः अंगुष्ठवर्जिता

भिरंगुलिभिर्विन्यस्य क्रींकीलकायनमः सर्वांगे। व्यस्तहस्तद्वयेन विन्यस्य करन्यासं कुर्यात्। ॐ क्रां अंगुष्ठाभ्यांनमः ॐ क्रीं तर्जनी० ॐ क्रूं मध्यमा० ॐ क्रैं आनामिका० ॐ क्रौं कनिष्ठिका० ॐ क्रः करतलकरपृष्ठाभ्यां० ॐ क्रां हृदयायनमः इति तर्जनीमध्यमानामाभिः॥ ॐ क्रीं शिरसे स्वाहा तर्जनीमध्यमाभ्यां। ॐ क्रूं शिखायै वषट् बद्धमुष्टिअधोमुखांगुष्ठेन। ॐ क्रैं कवचायहुं करद्वयांगुलिभिः। ॐ क्रौं नेत्रत्रयाय वौषट् तर्जनीमध्यमाभिर्नेत्रत्रये। ॐ क्रः अस्त्रायफट् इति तर्जनीमध्यमाभ्यां तालत्रयं त्रिर्दिग्बंधं च कृत्वा। अथमूलखंडत्रयेण न्यासं कुर्यात्। ॐ क्रीं हृदयायनमः इत्यंगुष्ठयो० ह्रं ५ शिरसे स्वाहेति तर्जन्योः क्रीं ८ शिखायै वषट् इति मध्यमयोः क्रीं ६ कवचायहुं इति नामिकयोः ह्रं ५ नेत्रत्रयाय वौषडिति कनिष्ठिकयोः क्रीं ८ अस्त्रायफट् इति करतलकरपृष्ठयोः इति मूलाधखंडत्रयं न्यासः अथ वर्णन्यासः। अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं नमो हृदि। एं ऐं ओं औं अं अः कं खं गं घं ङं नमो दक्षिणभुजे। ङं चं छं जं झं ञं टं ठं डं ढं नमो वामभुजे। णं तं थं दं धं नं पं फं बं भं नमो दक्षपादे। मं यं रं लं वं शं षं सं हं क्षं नमो वामपादे। सर्वानामयान्न्यसेत्। ततो मूलमुच्चरन्। पादादि शिरोन्तं। शिरादि पादांतं सकृद्व्यापकं विन्यस्य मातृकान्यासं कुर्यात्। आदौ प्राणायामत्रयं कृत्वा यथा स्वरैः पूरकं कादिभिः कुंभकं यादिभिरेचकमिति। अस्य श्रीमातृकान्यासस्य ब्रह्माऋषिः गायत्रीछंदः श्रीमातृकासरस्वती देवता हलो बीजं स्वराः शक्तयः अव्यक्तं कीलकं मम श्रीदक्षिणकालिकाङ्गत्वेन पूजांगत्वेन मातृकान्यासे वि० इति ऋष्यादिकं स्मृत्वा मूर्द्धादिषु विन्यस्य। ब्रह्मऋषयेनमः शिरसि गायत्रीछंदसेनमः मुखे श्रीमातृकासरस्वतीदेवतायैनमः हृदि। हलोबीजायनमः गुह्ये स्वरेभ्यः शक्तिभ्योनमः पादयोः अव्यक्तकीलकायायनमः सर्वांगे। ॐ अं कं ५ आं हृदयाय० इति दक्षांगुष्ठे। ॐ इं चं ५ ईं शिरसे स्वाहा नमः तर्जन्यां। ॐ उं टं ५ ऊं नमः शिखायै वषट् दक्षमध्यमायां। ॐ एं तं ५ ऐं नमः कवचाय हुं दक्षिणानामिकायां। ॐ ओं पं ५ औं नमः नेत्रत्रया० दक्षिणकनिष्ठायां। ॐ अं यं १० अः नमः अस्त्रायफट् दक्षकरतले। पुनः। ॐ अं कं ५ आं नमः हृदयाय० इति वामकरतले। ॐ इं चं ५ ईं नमः शिरसे स्वाहा वामकनिष्ठायां। ॐ उं टं ५ ऊं नमः शिखायै वषट् वामानामिकायां। ॐ एं तं ५ ऐं नमः कवचाय हुं मिति वाममध्यमायां। ॐ ओं पं ५ औं नेत्रत्रयाय वौषट् वामतर्जन्यां। ॐ अं यं १० अः नमः अस्त्राय वषट् इति वामांगुष्ठे इति विन्यस्य अस्त्रेण तालत्रयं दिग्बंधनं कुर्यात् इति ऋष्यादिकं न्यासः॥ तत्र प्रथमं सूक्ष्मरूपां ध्यात्वा अंतर्मातृकां न्यसेत्। तद्यथा। व्योमेंद्वोरसनार्णकमचांद्वंद्वैः स्फुरत्केशरं पत्रांतर्गतपञ्चवर्ग

शा०र०स०
॥२॥

पञ्चाशद्वर्णादि त्रिवर्गक्रमात् ॥ आद्यासु त्रिषु लांत लांगलयुजा क्षोणीपुरेणावृतं वर्णाभं शिरसि स्थितं विषगदप्रध्वंसि मृत्युंजयः इति ब्र
ह्मरंध्रे वर्णारविंदं ध्यात्वा । मूलाधाराद्ध्वनिं स्मृत्वा प्रबुध्य शक्तिं कुंडलिनीं ज्वलत्पावकसंकाशां सूक्ष्मतेजःस्वरूपिणीं । मूलाधाराच्छिरः
पद्मं स्पृशन्तीं विद्युदाकृतिं ॥ तथा स्पृष्ट्वा शिरःपद्मादमृतौघस्वरूपिणीं । निर्गतान्मातृकावर्णान् सुषुम्णावर्त्मना तनुं । व्यापयित्वा स्थि
तान्सर्वानेवं ध्यात्वा प्रविन्यसेत् ॥ तत्र विशुद्धौ षोडशदलकमलं धूम्रवर्णं ऊर्ध्वमुखं ध्यात्वा तद्दले पूर्वादिप्रादक्षिण्येन । ॐ अं नमः इ
त्यादि । ततो हृदये अनाहतचक्रे कुंकुमवर्णं द्वादशदलं ध्यात्वा तथैव ककारादि ठकारान्तान् वर्णान् ॐ आदि नमोन्तान्न्यसेत् । ॐ कं नमः इत्यादि
ततो नाभौ मणिपूरचक्रे । रक्तवर्णं दशदलं ध्यात्वा तद्दलेषु ॐ डं नमः इत्यादि फकारान्तं न्यसेत् । ततो लिंगमूले स्वाधिष्ठानचक्रे विद्युत्पुंजनिभं षड्दले
ध्यात्वा तद्दलेषु ॐ बं नमः इत्यादि लकारान्तान् षड्वर्णान्न्यसेत् । ततोपानाद्व्यंगुलोपरि मूलाधारे चतुर्दलं पीतवर्णं ध्यात्वा तद्दलेषु । ॐ वं नमः इत्यादि
सकारान्तांश्चतुरो वर्णान् न्यसेत् । ततो भ्रूमध्ये आज्ञाचक्रे शुक्लवर्णं द्विदलं ध्यात्वा तद्दले ॐ हं क्षं नमः इति वर्णद्वयं न्यसेत् । कर्पूरद्युतिनिभं । सहस्रद
लकमलकर्णिकायां त्रिकोणं ध्यात्वा । तत्त्रिकोणेषु प्रादक्षिण्येन तिसृषु रेखासु ॐ अं नमः इत्यादि स्वरान् १६ न्यसेत् । ततः पूर्वरेखासु ॐ कं नमः इत्यादि

तकारान्तं न्यसेत् तदुत्तररेखासु ॐ थं नमः इत्यादि सकारान्तं न्यसेत् । ॐ हं नमः ॐ क्षं नमः इति मध्ये न्यसेत् । इत्यन्तर्मातृकान्यासं कुर्यात् बहिर्मा
तृकान्यासं कुर्यात् ॥ तत्र ध्यानं ॥ सम्पूर्णेन्दुप्रभाभां सकललिपिमयीं लोलवक्त्रां त्रिनेत्रां मुक्ताभालंकारभूषां शशिमुकुटजटाजूटयुक्तां प्रसन्नाम् ॥
पुस्तकं पूर्णकुम्भान् वरमपि दधतीं शुक्लपद्मांबराढ्यां वाग्देवीं पद्मवक्त्रां कुचभरनमितां चिन्तयेत् साधकेन्द्रः इति ध्यात्वा मानसोपचारैः सम्पूज्य ॥
बहिःशरीरे न्यसेत् तद्यथा ॥ ॐ अं नमो ललाटे अनामामध्यमाभ्यां ॐ आं नमः मुखवृत्ते तर्जनीमध्यमाभिः ॐ इं नमो दक्षनेत्रे तर्जनीमध्यमाभिः
ॐ ईं नमो वामनेत्राभ्यां एव । ॐ उं नमो दक्षकर्णे अंगुष्ठाग्रेण । ॐ ऊं नमो वामकर्णे तथैव । ॐ ऋं नमो दक्षिनासापुटे कनिष्ठांगुष्ठाभ्यां । ॐ ॠं नमो वामना
सापुटे तथैव । ॐ ऌं नमो दक्षगंडे मध्यमाभ्यां । ॐ ॡं नमो वामगंडे तथैव । ॐ एं नमः ऊर्ध्वोष्ठे तथैव । ॐ ऐं नमः अधरे तथैव । ॐ ओं नमः ऊर्ध्वदंतपंक्तौ
अनामया । ॐ औं नमः अधोदंतपंक्तौ अनामया । ॐ अं नमः शिरसि मध्यमया । ॐ अः नमो जिह्वायां कनिष्ठानामामध्यमाभिः वकारपर्यंतं न्यसेत् ॥
ॐ कं नमो दक्षबाहुमूले । ॐ खं नमो दक्षकूर्परे । ॐ गं नमो दक्षमणिबंधे । ॐ घं नमो दक्षहस्तांगुलिमूले । ॐ ङं नमो दक्षकरांगुल्यग्रे । ॐ चं न
मो वामबाहुमूले । ॐ छं नमो वामकूर्परे । ॐ जं नमो वाममणिबंधे । ॐ झं नमो वामहस्तांगुलिमूले । ॐ ञं नमो वामकरांगुल्यग्रे । ॐ टं नमो दक्ष

शा० र०
३

पादमूले । ॐ ठं नमो दक्षजानुनि । ॐ डं नमो दक्षगुल्फे । ॐ ढं नमो दक्षपादांगुलिमूले । ॐ णं नमो दक्षपादांगुल्यग्रे । ॐ तं नमो वामपादमूले । ॐ
थं नमो वामजानुनि । ॐ दं नमो वामगुल्फे । ॐ धं नमो वामपादांगुलिमूले । ॐ नं नमो वामपादांगुल्यग्रे । ॐ पं नमो दक्षपार्श्वे । ॐ फं नमो वा
मपार्श्वे । ॐ बं नमः पृष्ठे । ॐ भं नमो नाभौ तर्जनीवर्ज्यसर्वाभिः । ॐ मं नमो जठरे । ॐ यं नमः पंचांगुलिभिर्वकारपर्यन्तं । ॐ यं त्वगात्मनेनमो
हृदि । ॐ रं असृगात्मनेनमो दक्षस्कंधे । ॐ लं मांसात्मनेनमः ककुदि । ॐ वं मेदात्मनेनमः वामस्कन्धे । ॐ शं अस्थ्यात्मनेनमो हृदादिद
क्षकरांगुल्यपर्यंतं । करतलेन क्षकारपर्यन्तं । ॐ षं मज्जात्मनेनमो हृदादिवामकरांगुल्यग्रपर्यन्तं । ॐ सं शुक्रात्मनेनमो हृदादिदक्ष
पादांगुल्यग्रपर्यंतं । ॐ हं जीवात्मनेनमः हृदादिवामपादांगुल्यपर्यंतं । ॐ लं परमात्मनेजठरादिहृदयपर्यंतं । ॐ क्षं नमो ज्ञानात्मनो
हृदादिमुखपर्यंतं इति मातृकान्यासः इति सृष्टिक्रमः ॥ अथ संहारमातृन्यासः ॥ ॐ अस्य श्रीसंहारमातृकान्यासः ब्रह्माऋषिः गाय
त्रीछंदः संहारमातृकादेवता हलोबीजानि । स्वराःशक्तयः अव्यक्तायकीलकं । श्रीदे० पूजांगत्वेन न्यासे विनियोगः ब्रह्मऋषयेनमः शिर
सि । गायत्रीछंदसेनमः मुखे । संहारमातृकादेवतायै हृदि । हलोबीजानि गुह्ये स्वराः शक्तयः पादयोः अव्यक्तकीलकाय सर्वांगे इति क्र

 

ष्यादिकं विन्यस्य करन्यासं कुर्यात् । ॐ अं यं रं लं वं शं षं सं हं क्षं अः नमः अस्त्राय फट् इत्यवामांगुष्ठे । ॐ औं पं फं बं भं मं औं नमः नेत्रत्रयाय
वौषट् इति वामतर्जन्यां । ॐ ऐं तं थं दं धं नं ऐं नमः कवचाय हुं इति वाममध्यमायां । ॐ उं टं ठं डं ढं णं ऊं नमः शिखायै वषट् इति वामानामि
कायां । ॐ ई चं छं जं झं ञं ई नमः शिरसे स्वाहा इति कनिष्ठायां । ॐ अं कं खं गं घं ङं आं हृदयाय नमः इति वामकरतले । पुनः ॐ अं यं ९
अः नमः अस्त्राय फट् इति दक्षकरतले । ॐ औं पं फं बं भं मं औं नमो नेत्रत्रयाय वौषडिति दक्षकनिष्ठायां । ॐ ऐं तं थं दं धं नं ऐं नमः कवचा
य हुमिति दक्षानामिकायां । ॐ उं टं ठं डं ढं णं ऊं नमः शिखायै वषडिति दक्षमध्यमायां । ॐ इं चं छं जं झं ञं ईं शिरसे स्वाहा इति दक्षतर्जन्यां
ॐ अं कं खं गं घं ङं आं हृदयाय नमः इति दक्षांगुष्ठे इति विन्यस्य त्रिणेव तालत्रयं दिग्बंधनं च कुर्यात् । अथ ध्यानं । अक्षस्रजं हरिण
पोतमुदग्रटंकं विद्याकरैरविरतं दधतीं त्रिनेत्रां ॥ अर्द्धेन्दुमौलिमरुणामरविन्दवासां वर्णेश्वरीं प्रणमत स्तनभारनम्रां एवं ध्यात्वा
मानसोपचारैः सम्पूज्य । बहिर्न्यासान् विन्यसेत् । ॐ क्षं ज्ञानात्मनेनमः मुखादिहृदयपरिपर्यंतं । ॐ लं परमात्मनेनमः हृदादिजठरपर्यंतं
ॐ हं जीवात्मनेनमो वामपादांगुल्यग्रादिहृदयांतं । ॐ सं शुक्रात्मनेनमो दक्षपादादिहृदयांतं । ॐ षं मज्जात्मनेनमो वामकरांगुल्यग्रा

गा० १०
॥५॥

दिहृदयान्तं । ॐ शं अस्थ्यात्मनेनमो दक्षकरांगुल्यग्रादिहृदयांतं । ॐ वं मेदात्मनेनमो वामस्कंधे । ॐ लं मांसात्मनेनमः ककुदि । ॐ रं असृगात्मनेन
मो दक्षस्कंधे । ॐ यं त्वगात्मनेनमो हृदि । ॐ मं नमो जठरे । ॐ भं नमो नाभौ । ॐ बं नमः पृष्ठे । ॐ फं नमो वामपार्श्वे । ॐ पं नमो दक्षपार्श्वे । ॐ नं नमो
वामपादांगुल्यग्रे । ॐ धं नमो वामपादांगुलिमूले । ॐ दं नमो वामगुल्फे । ॐ थं नमो वामजानुनि । ॐ तं नमो वामपादमूले । ॐ णं नमो दक्षपादांगुल्यग्रे ।
ॐ ढं नमो दक्षपादांगुलिमूले । ॐ डं नमो दक्षगुल्फे । ॐ ठं नमो दक्षजानुनि । ॐ टं नमो दक्षपादमूले । ॐ ञं नमो वामकरांगुल्यग्रे । ॐ झं नमो वामकरां
गुलिमूले । ॐ जं नमो वाममणिबंधे । ॐ छं नमो वामकूर्परे । ॐ चं नमो वामबाहुमूले । ॐ ङं नमो दक्षकरांगुल्यग्रे । ॐ घं नमो दक्षकरांगुलिमूले ।
ॐ गं नमो दक्षमणिबंधे । ॐ खं नमो दक्षकूर्परे । ॐ कं नमो दक्षबाहुमूले । ॐ अः नमो जिह्वायां । ॐ अं नमः शिरसि । औं औं नम अधोदंतपंक्तौ । ॐ ओं
नम ऊर्द्ध्वदन्तपंक्तौ । ॐ ऐं नम अधरे । ओं एं नमो ऊर्ध्वोष्ठे । ॐ लॄं नमो वामगंडे । ॐ लृं नमो दक्षगंडे । ॐ ॠं नमो वामनासायां । ॐ ऋं नमो दक्षना
सायां । ॐ ऊं नमो वामकर्णे । ॐ उं नमो दक्षकर्णे । ॐ ईं नमो वामनेत्रे । ॐ इं नमो दक्षनेत्रे । ॐ आं नमो मुखवृत्ते । ॐ अं नमो ललाटे । सर्वत्र तत्ता
भिरेव मुद्राभिर्न्यसेत् । ॥ इति संहारमातृकान्यासः ॥ अथ स्थितिन्यासः ॥ अस्य श्रीस्थितिमातृकामंत्रस्य । ब्रह्मा ऋषिः गाय

त्री छंदः । स्थितिमातृका देवता । हलो बीजं । स्वराः शक्तयः । अव्यक्तकीलकं इति ऋष्यादिकं स्मृत्वा न्यसेत् । यथा । ॐ ब्रह्मऋषये नमः शिरसि । गाय
त्री छंदसे नमः मुखे । ॐ स्थितिमातृकादेवताय० हृदय । हलो बीजाय नमः गुह्ये । स्वरेभ्यो शक्तिभ्यो० पादयोः । अव्यक्तकीलकाय सर्वांगे । श्रीदक्षि०मूर्तां गत्व
न्यासे वि० इति ऋष्यादिकं विन्यस्य करं न्यासं कुर्यात् । तद्यथा । ॐ अं कं ध हृदयाय नमः अंगुष्ठयोरेकदेव । ॐ इं चं ध शिरसे स्वाहा तर्जन्योः । ॐ उं टं ध शिखा
यै वषट् मध्यमयोः । ॐ एं तं ध कवचाय हुं अनामिकयोः । ॐ ओं पं ध नेत्रत्रयाय वौषट् कनिष्ठयोः । ॐ अं यं - अं नमः अस्त्राय फट् करतलयोर्विन्यस्य
तेनैव तालत्रयं दिग्बंधनं कुर्यात् । ध्यानं ॥ सिन्दूरकांतिममिताभरणां त्रिनेत्रां विद्याक्षसूत्रमृगपोतवरान्दधानं ॥ पार्श्वस्थितां भगवतीमपि कांचनाढ्यां
ध्याये कराब्जधृतपुस्तकवर्णमालां ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य बहिःशरीरे न्यसेत् । यथा । ॐ मं नमो जठरे । ॐ भं नमो नाभौ । ॐ बं नमः पृष्ठे । ॐ फं
नमो वामपार्श्वे । ॐ पं नमो दक्षपार्श्वे । ॐ नं नमो वामपादांगुल्यग्रे । ॐ धं नमः अंगुलिमूले । ॐ दं नमो गुल्फे । ॐ थं नमो जानुनि । ॐ तं नमः पादमूले । ॐ
ॐ णं नमो दक्षपादांगुल्यग्रे । ॐ ढं नमः अंगुलिमूले । ॐ डं नमो गुल्फे । ॐ ठं नमो जानुनि । ॐ टं नमः पादमूले । ॐ ञं नमो वामकरांगुल्यग्रे । ॐ झं नमः अंगुलि
मूले । ॐ जं नमो मणिबंधे । ॐ छं नमः कूर्परे । ॐ चं नमो बाहुमूले । ॐ ङं नमो दक्षकरांगुल्यग्रे । ॐ घं नमः अंगुलिमूले । ॐ गं नमो मणिबंधे । ॐ खं नमः कू

शा०र०
५

पेरे। ॐ कं नमः बाहुमूले। ॐ अः नमो जिह्वाग्रे। ॐ अं नमः शिरसि। ॐ औं नमः अधोदंतपंक्तौ। ॐ ओं नमः ऊर्ध्वदंतपंक्तौ। ॐ ऐं नमः अधरे। ॐ एं नमः
ऊर्ध्वोष्ठे। ॐ ॣं नमो वामगंडे। ॐ ॢं नमो दक्षगंडे। ॐ ॠं नमो वामनासायां। ॐ ऋं नमो दक्षनासायां। ॐ ऊं नमो वामकर्णे। ॐ उं नमो दक्षकर्णे। ॐ
ईं नमो नेत्रे। ॐ इं नमो दक्षनेत्रे। ॐ आं नमो मुखवृत्ते। ॐ अं नमो ललाटे। ॐ क्षं ज्ञानात्मनेन नमो मुखादिहृदयान्तं। ॐ सं शुक्रात्मनेन नमो दक्षपादां
गुल्यादिहृदयान्तं। ॐ षं मज्जात्मनेन नमो वामकरांगुल्यादिहृदयांतं। ॐ शं अस्थ्यात्मनेन नमो दक्षकरांगुल्यादिहृदयांतं। ॐ वं मेदात्मनेन नमो वामस्कं
धे। ॐ लं मांसात्मनेन नमः ककुदि। ॐ रं असृगात्मनेन नमो दक्षस्कंधे। ॐ यं त्वगात्मनेन नमो हृदि। इति स्थितिमातृकान्यासः। इति सृष्टिसंहृतिस्थितिमा
तृकान्यासं विधाय षडंगेषु न्यसेत्। अं कं ध आं हृदयाय नमः इति हृदये। इं चं ध ईं नमः शिरसे स्वाहा। उं टं ध ऊं नमः शिखायै वषट्। एं तं ध ऐं नमः कव
चाय हुं। ओं पं ध औं नमो नेत्रत्रयाय वौषट्। अं यं टं अः नमः अस्त्राय फट्। इतिना एवमुद्रया मुष्टिं गुष्ठतर्जनिध्वनिभिः परितो दशदिक्षु इति ष
डंगन्यासः। अथ विंदुमातृकान्यासः॥ अस्य श्री विन्दुमातृकान्यासस्य। ब्रह्मा ऋषिः। गाय० छं० श्री विंदुमातृ० देव०। हलो बीजानि। स्वराश्श
क्तयः। अव्यक्तं कीलकं। श्री दक्षि० पूजांगत्वेन्यासे वि०। इति ऋष्यादिकं स्मृत्वा न्यसेत्। ॐ ब्रह्मऋषये नमः शिरसि। गाय० छंद० मुखे। विंदुमातृका

सर० देव० हृदि। हलेभ्यो बीजेगुह्ये। स्वरेभ्यः शक्तिभ्यः पादयोः। अव्यक्तकी० सर्वांगे। श्रीद० इति ऋष्यादिकं स्मृत्वा करन्यासं कुर्यात्। ॐ अं क्षं टं अं अस्त्रा
ले यफट्॥ तद्यथा। ॐ अं क्षं हं सं षं शं वं लं रं यं अं अस्त्राय फट् इति। ॐ औं मं भं बं फं पं औं कनिष्ठाभ्यां नमः इति नेत्रत्रयो। ॐ ऐं नं धं दं थं तं एं अनामिकाभ्यां कव
चे। ॐ ऊं णं ढं डं ठं टं उं मध्यमाभ्यां शिखायां। ॐ ईं ञं झं जं छं चं इं तर्जनीभ्यां नमः इति शिरसि। ॐ आं ङं घं गं खं कं अं अंगुष्ठाभ्यां नमः इति हृदि। ध्यानं॥ ध्येया
द्रूर्णमये पद्मे देवीं वाग्वल्लभां शिवां। असृक्सजं हरिणपोतमुदग्रटंकं। विद्यां करे रविरतं दधतीं त्रिनेत्रां अर्द्धेन्दुमौलिमरुणामरविंदवासां वर्णेश्वरीं प्रणत
स्तनभारनम्रां। इति ध्यात्वा मानसोपचारैः सम्पूज्य न्यसेत्। यथा। ॐ क्षं हं ज्ञानात्मनेन नमो मुखादिहृदयपर्यंतमित्यादि न्यसेदिति विन्दुमातृकान्यासः॥
अथ विसर्गमातृकान्यासः। अस्य श्री विसर्गमातृकान्यासस्य। ब्रह्मा ऋषिः गायत्री छंदः विसर्गमातृकादेवता। हलो बीजानि। स्वराः शक्तयः। अव्यक्तं कीलं०
श्रीदक्षि० पूजांगत्वेन न्यासे वि०। ॐ ब्रह्मणे ऋषये नमः शिरसि। ॐ ब्रह्मगायत्र्यै छंदसे नमः मुखे। ॐ विसर्गमातृकादेवतायै हृदि। हलभ्यो बीजेगुह्ये
स्वरेभ्यः शक्तिभ्यः पादयोः। अव्यक्तकीलकाय नमः सर्वांगे। श्रीदक्षि० पूजां० न्यासे वि०। अः कः ध आः हृदयाय नमः इत्यंगुष्ठयोः। इः चः ईः शिरसे स्वाहेति तर्जं०
उः टः ध ऊः शिखायै वषट् मध्यमयोः। एः तः ध ऐः कवचाय हुं इत्यनामिकयोः। ओः पः ध औः नमो नेत्रत्रयाय कनिष्ठयोः। अः यः ध अः नमः अस्त्राय फट् करतलपृ०

शा०र०
१६॥ पंचाशल्लिपिभिर्विभक्तमुखदोः पन्मध्यवक्षस्थलां भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुंगस्तनीं । मुद्रामक्षगुणं सुधाढ्यकलशं बि... चह
स्तां कुजैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ॥ इति विसर्गमातृकां भोजदेशीं ध्यात्वा मानसोपचारैः सम्पूज्य । बहिः शरीरे न्यसेत् । ॐ अः
नमः श्रीं आः नमो मुखवृत्ते इत्यादि । इति विसर्गमातृकान्यासः । अथ विसर्गविंदुमातृकान्यासः । ॐ विसर्गविंदुमातृकान्यासस्य । ब्रह्मा ऋषिः । गा
यत्री छंदः । विसर्गविंदुमातृका सरस्वती देवता । हलो बीजं । स्वराः शक्तयः श्री सरस्वती देवताप्रीत्यर्थं न्यासे विनियोगः । ॐ ब्रह्मणे ऋषये नमः शिरसि । गायत्रीछंदसे मुखे
ॐ विसर्गविंदुमातृकादेवतायै हृदि । हलेभ्यो बीजेभ्यो गुह्ये । स्वरेभ्यः शक्तयोः पादयोः श्रीदक्षि० प्रीत्यर्थं न्यासे वि० । ॐ अं कं खं गं घं ङं आं हृदयाय अंगु
ष्ठयोः । ॐ इं चं छं जं झं ञं ईं नमः शिरसे तर्जन्योः । ॐ उं टं ठं डं ढं णं ऊं नमः शिखायै मध्यमयोः । ॐ एं तं थं दं धं नं ऐं कवचाय० नामिकयोः । ओं ओं पं फं बं भं मं औं
नमो नेत्रत्रयाय० कनिष्ठयोः । ॐ अं यं रं लं वं शं षं सं हं ळं क्षं अः नमः अस्त्राय० करतलकरपृष्ठयोः । ध्यानं । सिंदूरकांतिममिताभरणां त्रिनेत्रां विद्याक्षसूत्रमृगपोतवरं दधानां ।
पार्श्वस्थितां भगवतीमपि कांचनाभां ध्यायेत्कराब्जधृतपुस्तकवर्णमालां ॥ १ ॥ ध्यायन्स्वर्णकस्थितिक्रमेण न्यसेत् । ॐ अं नमो जठरे । ॐ भं नमो नाभौ इत्या
दि । ॐ यं त्वगात्मने नमो हृदयांतं । पूर्ववत् न्यसेत् । अथवा । ॐ ङं नमो दक्षगुल्फे इत्यादि प्रतिलोमक्रमेण । ॐ ठं नमो दक्षजानुनि इत्यं तं क्रमेण न्यसेत् ॥ ६

त्यादि विसर्गविंदुमातृकान्यासः । एतत्त्रयमेव सृष्टिस्थितिसंहारमातृकान्यासः । न्यासप्रकारो नान्य इति केचित् । अथ शक्तिमातृकान्यासः । ॐ अस्य
श्रीशक्तिमातृकान्यासस्य । शक्तिर्ऋषिर्गायत्री छंदः आदिशक्तिमातृकामयी भुवनेश्वरी देवता शक्तिप्रीत्यर्थं न्यासे वि० । शक्तये ऋषये नमः शिरसि । गायत्री
२थं छंदसे नमः मुखे । आदिशक्तिमातृकामयी भुवनेश्वरी देवतायै नमो हृदि । इति ऋष्यादिकं विन्यस्य करन्यासं कुर्यात् । ॐ अं कं खं गं घं ङं आं ह्रां हृदयाय अंगुष्ठयोः । ॐ
इं चं छं जं झं ञं ईं ह्रीं शिरसे० तर्जन्योः । ॐ उं टं ठं डं ढं णं ऊं ह्रूं शिखायै० मध्यमयोः । ॐ एं तं थं दं धं नं ऐं ह्रैं कवचाय० अनामिकयोः । ॐ ओं पं फं बं भं मं औं ह्रौं नेत्रत्रयाय० कनिष्ठयोः
ॐ अं यं रं लं वं शं षं सं हं ळं क्षं अः ह्रः अस्त्राय० करतलकरपृष्ठयोः । ततो ध्यानं ॥ उद्यत्कोटिदिवाकरप्रतिभटां तुंगोरुपीनस्तनीं बद्धार्धेन्दुकिरीटहाररसनामंजीरसंशोभितां
बिभ्राणां करपंकजैर्जपवटीपाशांकुशौ पुस्तकं दिव्याद्यां जगदीश्वरीं त्रिनयनां पयोदराणां श्रियं इति ध्यात्वा मानसोपचारैः संपूज्य । सृष्टिक्रमेणैव
न्यसेत् । ॐ ह्रीं अं नमो ललाटे । ॐ ह्रीं आं नमो मुखवृत्ते इत्यादि । ॐ ह्रीं क्षं नमो हृदयादि मुखांतं । इत्यं तं तत्स्थानेषु न्यसेत् । इति शक्तिमातृकान्यासः
अथ तारोत्थकलामातृकान्यासः । अस्य श्रीप्रणवकलामातृकान्यासमंत्रस्य । प्रजापतिऋषिर्गायत्री छंदः । कलामातृका शारदा देवता । हलो बीजानि
स्वराः शक्तिः । भक्त्यंगत्वेन न्यासे वि० । प्रजापतये ऋषये नमः शिरसि । गायत्रीछंदसे नमः मुखे । कलामातृका शारदा देवतायै नमो हृदि । हलेभ्यो बीजेभ्यो

नमः गुह्ये । स्वरेभ्यः शाक्तेयपादयोः । शाक्तिमन्त्री न्यासे० इति ऋष्यादिकं स्मृत्वा करन्यासं कुर्यात् । अं ओं आं हृदयायेति गुष्ठयोः । इं ओं ईं शिरसे स्वाहा
इति तर्जन्योः । उं ओं ऊं शिखायै वषट् मध्यमयोः । एं ओं ऐं कवचायेति नामिकयोः । ओं ओं औं नेत्रत्रयायेति कनिष्ठिकयोः । अं ओं अः अस्त्राय फडिति क
रतलकरपृष्ठयोः । ध्यानं । हस्तैः पद्मं रथांगं गुणमयहरिणं पुस्तकं वर्णमालां टंकं शूलं कपालं दरममृतलसद्धेमकुम्भं वहन्तीं । मुक्ताविद्युत्पयोदस्फटिक
नवजपाबन्धुरैः पञ्चवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रां सकलशशिनिभां शारदां तां नमामि । वामाधो हस्तादारभ्य पद्मांगानि ज्ञेयानि । ध्यात्वा मानसैः संपूज्य
न्यसेत् । तद्यथा । ॐ अं निवृत्त्यै नमः ललाटे । ॐ आं प्रतिष्ठायै० मुखवृत्ते । ॐ इं विद्यायै दक्षनेत्रे । ॐ ईं ईशान्यै० वामनेत्रे । ॐ उं एधिकायै० दक्षकर्णे
ॐ ऊं दीपिकायै० वामकर्णे । ॐ ऋं रेचिकायै० दक्षनासायां । ॐ ॠं मोचिकायै० वामनासायां । ॐ लृं परायै० दक्षगंडे । ॐ लॄं सूक्ष्मायै० वामगंडे । ॐ
एं सूक्ष्मामृतायै० ओष्ठे । ॐ ऐं ज्ञानामृतायै० अधरे । ॐ ओं आप्यायिन्यै० ऊर्द्ध्वदंतपंक्तौ । ॐ औं व्यापिन्यै० अधोदंतपंक्तौ । ॐ अं व्योमरूपायै० शिरसि । ॐ
अः अनंतायै० जिह्वायां । एताः स्वरजाः कलाः । सदाशिवेन संजाताः नादांताः सितविग्रहाः ॥ अक्षस्रक्पुस्तकगुणकमलाब्जकरांबुजाः । इति ध्येयाः ॥ ततः ओं
कं सृष्ट्यै दक्षबाहुमूले । ॐ खं ऋद्ध्यै० कूर्परे । ॐ गं स्मृत्यै० मणिबंधे । ॐ घं मेधायै० अंगुलिमूले । ॐ ङं कांत्यै० अंगुल्यग्रे । ॐ चं लक्ष्म्यै० वामबाहुमूले । ॐ

छं द्युत्यै नमः कूर्परे । ॐ जं स्थिरायै० मणिबंधे । ॐ झं स्थित्यै० अंगुलिमूले । ॐ ञं सिद्ध्यै० अंगुल्यग्रे । एताः कचवर्गकलाः । अकराद् ब्रह्मणो स
न्नास्तप्तचामीकरप्रभाः । करांबुजमृताक्षस्रक्पंकजाभयकुण्डिका इति ध्येयाः ॥ ॐ टं जरायै० दक्षोरुमूले । ॐ ठं पालिन्यै० दक्षजानुनि ।
ॐ डं शान्त्यै० दक्षगुल्फे । ॐ ढं ऐश्वर्यै० अंगुलिमूले । ॐ णं रत्यै० अंगुल्यग्रे । ॐ तं कामिन्यै० वामोरुमूले । ॐ थं वरदायै० जानुनि । ॐ दं
आह्लादिन्यै० वामगुल्फे । ॐ धं प्रीत्यै अंगुलिमूले । ॐ नं दीर्घायै० अंगुल्यग्रे । एतास्टवर्गतवर्गजाः कलाः । उकाराद्विष्णुनोत्पन्नास्तमालदल
सन्निभाः ॥ अभीत्युद्गारचक्रेष्वाहवः परिकीर्तिता इति ध्येयाः ॥ ॐ पं तीक्ष्णायै० दक्षपार्श्वे । ॐ फं रौद्र्यै० वामपार्श्वे । ॐ बं भद्रायै० पृष्ठे । ॐ
भं निद्रायै० नाभौ । ॐ मं तंद्रायै० जठरे । ॐ यं क्षुधायै० हृदि । ॐ रं क्रोधिन्यै० दक्षस्कंधे । ॐ लं क्रियायै० ककुदि । ॐ वं उल्कायै० वामस्कंधे । ॐ
शं मृत्युरूपायै० हृदयादिदक्षकरांगुल्यग्रपर्यंतं । एताः पवर्गाद्याः कलाः रुद्रेण मार्णदुत्पन्नाः शारचंद्रनिभाः । उद्वहन्त्योभयं शूलं कपालं बा
हुभिर्वरमिति ध्येयाः । ॐ षं पीतायै० हृदादिवामकरांगुल्यग्रपर्यंतं । ॐ सं श्वेतायै० हृदादिदक्षपादांगुल्यग्रपर्यंतं । ॐ हं अरुणायै० हृदा
दिवामपादांगुल्यग्रपर्यंतं । ॐ [illegible] असितायै० जठरादिहृदयांतं । ॐ क्षं अनंतायै० हृदादिमुखपर्यंतं । एताः यवर्गस्थाः कलाः ईश्वरेण

श्रा०र०
॥८॥

दिताविंदोंजपाकुसुमसन्निभाः॥अभयंहरणंटंकंदधानावहुभिर्वरमितिध्येयाः इतिपञ्चाशद्रुद्राख्यानाकलाः।सर्वसमृद्धिदाः मोक्षार्थी
चसदाकुर्याद्देव्यात्मासुखमाप्नुयात्।इतितारीत्यकलामातृकान्यासः।अथश्रीकण्ठादिन्यासः।अस्यश्रीकंठपूर्णोदर्यादिन्यासस्य।श्री
दक्षिणामूर्तिऋषिः गायत्रीछंदः श्रीअर्द्धनारीश्वरोदेवता।हांबीजं स्रौंःशक्तिः।क्लौंकीलकं श्रीमद्दक्षिणाकालिकाराधनांगत्वे सर्वाभि ग२
ष्टसिद्ध्यर्थेजपेविनि०।दक्षिणामूर्तिऋषयेनमः शिरसि।गायत्रीछंदसेनमः मुखे।अर्द्धनारीश्वरदेवतायेनमः हृदि।हांबीजायनमः गु
ह्ये।स्रौंःशक्तयेनमः पादयोः।क्लौंकीलकायनमः सर्वांगे।अथषडंगकुर्यात्।ह्स्रांअंगुष्ठाभ्यांनमः इतिअंगुष्ठयोः।ह्स्रींशिरसेतितर्जन्योः।
ह्स्रूंशिखायैवषट्मध्यमयोः।ह्स्रैंकवचायहुमितिअनामिकयोः।ह्स्रौंनेत्रत्रयायमित्यकनिष्ठिकयोः।ह्स्रः अस्त्रायफट्इतिकरतलकरपृ
ष्ठे।ध्यानं॥बंधूककांचननिभंरुचिराक्षमालांपाशांकुशौचवरदंनिजबाहुदंडैः।बिभ्राणमिंदुशकलाभरणंत्रिनेत्रमर्द्धाम्बिकेशमनिशं
वपुराश्रयामि इतिध्यात्वामानसैःसम्पूज्यन्यसेत्।तद्यथा।अंश्रीकंठपूर्णोदरीभ्यांनमोललाटे।आंअनंतेशविजयाभ्यां मुखवृत्ते।इंसु
क्ष्मेशशाल्मलीभ्यां० दक्षनेत्रे।ईंत्रिमूर्तिशलोलाक्षीभ्यां० वामनेत्रे।उंअमरेशवर्तुलाक्षीभ्यां० दक्षकर्णे।ऊंअर्घीशदीर्घघोणाभ्यां० वाम

कर्णे।ऋंभारभूतेशसुदीर्घमुखीभ्यां० दक्षनासापुटे।ॠंअतिथीशगोमुखीभ्यां० वामनासापुटे।ऌंस्थाणुशदीर्घजिह्वाभ्यां० दक्षगंडे।ॡं
हरेशकुंडोदरीभ्यां० वामगंडे।एंउंटीशोर्द्ध्वकेशीभ्यां० ऊर्ध्वोष्ठे।ऐंभौतिकेशविकृतमुखीभ्यां० अधरे।ओंसद्योजातेशज्वालामुखीभ्यां० ऊर्ध्वदंत
पंक्तौ।औंअनुग्रहेशोल्कामुखीभ्यां० अधोदंतपंक्तौ।अंअक्रूरेशसुश्रीमुखीभ्यां० शिरसि।अःमहासेनेशविद्यामुखीभ्यां० जिह्वायां।कंक्रोधीश
महाकालीभ्यां० दक्षबाहुमूले।खंचंडेशसरस्वतीभ्यां० कूर्परे।गंपंचांतकेशसर्वसिद्धिगौरीभ्यां० मणिबंधे।घंशिवोत्तमेशत्रैलोक्यविद्याभ्यां०
अंगुलिमूले।ङंएकरुद्रेशमंत्रशक्तिभ्यांदक्षकरांगुल्यग्रे।चंकूर्मेशआत्मशक्तिभ्यां० वामबाहुमूले।छंएकनेत्रेशभूतमातृकाभ्यां० कूर्परे
जंचतुराननेशलंबोदरीभ्यां० मणिबंधे।झंअजेशद्राविणीभ्यां० अंगुलिमूले।ञंसर्वेशनागरीभ्यां० अंगुल्यग्रे।टंसोमेशखे
चरीभ्यां० दक्षोरुमूले।ठंलांगलीशमंजरीभ्यां० दक्षजानुनि।डंदारुकेशरूपिणीभ्यां० गुल्फे।ढंअर्द्धनारीशवीरणाभ्यां०
अंगुलिमूले।णंउमाकांतेशकाकोदरीभ्यां० दक्षपादांगुल्यग्रे।तंआषाढीशपूतनाभ्यां० वामोरुमूले।थंदंडीशभद्रकालीभ्यां०
वामजानुनि।दंअत्रीशयोगिनीभ्यां० गुल्फे।धंमीनेशशंखिनीभ्यां० वामांगुलिमूले।नंमेषेशगर्जिनीभ्यां० वामांगुल्यग्रे॥

श्या०र०
॥९॥

फंलोहितेशाकालरात्रिभ्यां० दक्षपार्श्वे। फं शिखीशाकुब्जिकाभ्यां० वामपार्श्वे। बं गलडेशाकपर्दिनीभ्यां० पृष्ठे। भं द्विरंडीशावज्रिणिभ्यां०
नाभौ। मं महाकालेशाजयाभ्यां० जठरे। यं त्वगात्मने कपालीशासुमुखेश्वरीभ्यां नमो हृदये। रं असृगात्मने भुजंगेशारेवतीभ्यां० दक्षस्कं
धे। लं मांसात्मने पीनाकीशामाधवीभ्यां० ककुदि। वं मेदात्मने खड्गीशावायवीभ्यां० वामस्कंधे। शं अस्थ्यात्मने वकेशावाहभ्यां० हृ
दादिदक्षकरांगुलिपर्यंतं। षं मज्जात्मने श्वेतेशारक्षोविदारिणीभ्यां० हृदादिवामकरांगुल्यग्रपर्यंतं। सं शुक्रात्मने भृग्वीशासहजा
भ्यां० हृदादिदक्षपादांतं। हं जीवात्मने नकुलिशाभद्रकालीभ्यां० हृदादिवामपादांतं। लं परमात्मने शिवेशाव्यापिनीभ्यां० जठरादिहृदयांतं।
क्षं तानात्मने संवर्त्तेशामहामायाभ्यां नमो हृदादिमुखांतं। इति श्रीकंठादिन्यासः॥ अथ षोढान्यासः॥ तद्यथा। अं नमः ललाटे इत्या
दिपूर्ववदित्येकः॥१॥ श्रीं अं श्रीं आं श्रीं अं नमो ललाटे इत्यादिमातृकास्थाने न्यसेत् इति द्वितीयः। क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमो ललाटे
इत्यादिपूर्ववत्। ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमो ललाटे इत्यादिपूर्ववत्। ४ मूलं ह्रां ह्रां अं अं कुं मूलं ह्रां ह्रां अं अं कुं मूलं ह्रां ह्रां अं अं कुं नमो ल
लाटे इत्यादिपूर्ववदिति पंचमः। अनुलोमविलोमाभ्यां मातृकास्थाने केवलं। मूलं विन्यस्याष्टोत्तरशतं मूलेन व्यापकं कुर्यादिति षष्ठः। इति ह

रगौरीसंवादे श्रंगषोढासमाप्त॥ अथ गुह्यषोढा॥ अं क्रीं क्रीं क्रीं अं क्रीं क्रीं क्रीं अं क्रीं क्रीं क्रीं नमो ललाटे इत्यादिपूर्ववत्। अं हूं हूं अं हूं हूं
अं हूं हूं नमो ललाटे इत्यादिपूर्ववद्द्वितियः॥२॥ अं ह्रीं ह्रीं अं ह्रीं ह्रीं अं ह्रीं ह्रीं नमो ललाटे इत्यादि॥३॥ अं दक्षिणे कालिके क्रीं ३। अं द
क्षिणे कालिके क्रीं ३ अं दक्षिणे कालिके क्रीं ३ नमो ललाटे इत्यादि ४ अं हूं हूं ह्रीं ह्रीं स्वाहा अं हूं हूं ह्रीं ह्रीं स्वाहा अं हूं हूं ह्रीं ह्रीं स्वाहा ४
अं हूं हूं ह्रीं ह्रीं स्वाहा अं हूं हूं ह्रीं ह्रीं स्वाहा अं हूं हूं ह्रीं ह्रीं स्वाहा नमो ललाटे॥ इत्यादि पंचमः॥५॥ ततः सकलमूलं केवलं पू
र्ववद्विन्यस्य मूलेनाष्टोत्तरशतं व्यापकं कुर्यात्। दिति षष्ठः। इति गुह्यषोढा॥ अथ पंचयोनिन्यासः। क्रीं ७ नेत्रत्रयोः। द०६
नासिकयोः। क्रीं ८ शिखाये। क्रीं ७ वदने। द०६ कर्णयोः। क्रीं ८ चिबुके। क्रीं ७ स्तनयोः। द०६ नाभौ। क्रीं ८ ऊर्वौ। क्रीं २२ पाद
योः। इति पंचयोन्यात्मकंन्यासः। अथ तत्वन्यासः। क्रीं आत्मतत्वाय नमः पादादिनाभिपर्यंतं। द०६ विद्यातत्वाय नमो नाभ्यादिहृ
दयांतं। क्रीं ८ शिवतत्वाय नमो हृदयादिशिरोन्ततत्वमुद्रयान्यसेत्। इति तत्वन्यासः। अथ बीजन्यासः। क्रीं नमो ब्रह्मरंध्रे। क्रीं न
मो भ्रूमध्ये। क्रीं नमो ललाटे। हूं नमो भ्रूयुगे। हूं नमो कर्णयोः। ह्रीं नमो गंडयोः। ह्रीं नमो हृदि। क्रीं नमः पार्श्वयोः। क्रीं नमः पृष्ठे

क्रींनमोनाभौ। हूंनमोलिंगे। हूंनमोकट्योः। ह्रींनमोगुह्ये। ह्रींनमःकरयोः। स्वांनमःपादयोः। हांनमःसर्वांगे। ।१०। अन्य
प्रकारेण॥ क्रींनमोमूर्द्धि। क्रींनमोललाटे। क्रींनमोभ्रुमध्ये। हूंनमोदक्षगंडे। हूंदक्षनेत्रे। ह्रींनमःश्रोत्रे। ह्रींनमोदक्षनासापुटे
दंनमोवामगंडे। क्षिंनमोवामनेत्रे। णंनमोवामश्रोत्रे। कांनमोवामनासापुटे। लिंनमोउर्ध्वोष्ठे। कैंनमोअधरे। क्रींनमोउर्ध्वदंतपंक्तौ।
क्रींनमोअधोदंतपंक्तौ। क्रींनमोहृदये। हूंनमोदक्षभुजे। हूंनमोवामभुजे। ह्रींनमोनाभौ। ह्रींनमोदक्षपादे। स्वांनमोवामपादे। हांनमो
सर्वांगे। इतिमंत्रवर्णन्यासः। ततोनवधासप्तधापंचधामूलमुच्चरन्व्यस्तहस्ताभ्यां पादादिशिरोतंशिरआदिपादांतंव्यापकंन्यासंविधाय॥
पीठन्यासंकुर्यात्। ततः स्त्रीवेषधारीस्यात्सिंदूरांकितभालकः। शृंगारोज्वलवेषाढ्यस्तांबूलपूरिताननः। एवंवेषादिकंसर्ववनितामपि
कारयेत्। इतिपीठन्यासः। मूलाधारेआधारशक्त्येनमः। स्वाधिष्ठानेप्रकृत्येनमः। मणिपूरेकूर्मायनमः। हृदिअनंतायपृथि
व्येनमः। सुधांबुधयेनमः। मणिद्वीपायनमः। चिंतामणिगृहाये॰ श्मशानाय॰ पारिजातायनमः। तन्मूलेरत्नवेदिकायै॰। म
णिपीठाय॰। चतुर्दिक्षुनानामुनिभ्यो॰। नानादेवेभ्यो॰ शवेभ्यो॰। शवमुंडेभ्यो॰। खड्गमांसास्थिमोदमानशिवेभ्यो॰। ॐधंधर्मा

यनमोदक्षांसे। ॐज्ञांज्ञानायनमोवामांसे। ॐवैराग्याय॰ वामोरौ। ॐऐश्वर्यायदक्षोरौ। ॐअधर्माय॰ मुखे। ॐअज्ञानाय॰ वामपार्श्वे।
अवैराग्याय॰ नाभौ। अनैश्वर्याय॰ दक्षपार्श्वे। ततोहृदि। अनंतकंदाय॰। संविन्नालाय॰। सर्वतत्वात्मकपद्माय॰। प्रकृतिमयपद्मपत्रे
भ्यो॰। विकारमयकेसरेभ्यो॰। पंचाशद्वर्णबीजाढ्यकर्णिकायै॰। अंद्वादशकलात्मनेसूर्यमंडलाय॰। ॐषोडशकलात्मनेचंद्रमंडला
य॰। वंदशकलात्मनेवह्निमंडलाय॰। संसत्वाय॰। रंरजसे॰। तंतमसे॰। आंआत्मने॰। पंपरमात्मने॰। ह्रींज्ञानात्मने॰। अष्टदिक्षु। ॐ
इच्छायै॰। ज्ञानायै॰। क्रियायै॰। कामिन्यै॰। कामदीपिन्यै॰। रत्यै॰। रतिप्रियायै॰। आनंदायै॰। मध्ये मनोन्मन्यै॰। ऐंपरायै॰। अ
परायै॰। परापरायै॰। सौः सदाशिवमहाप्रेतपद्मासनाय॰। इतिपीठन्यासः। ॥ • ॥ • ॥ ०॥ ०॥ ०॥ ०॥
अथप्रपंचन्यासः॥ तद्यथा। ॐह्रींहंसःसोहंस्वाहेतिपरमात्माष्टाक्षरमंत्रस्य। ब्रह्माऋषि। गायत्रीछंदः। सच्चिदानं
दज्योतिरात्मस्वरूपिणीमातृकासरस्वतीदेवता। प्रपंचयोगेविनियोगः। ब्रह्मर्षयेनमःशिरसि। गायत्रीछंदसेनमः
१२। मुखे। सच्चिदानंदज्योतिस्वरूपिणीमातृकासरस्वतीदेवतायेनमःहृदि। इतिऋष्यादिकंस्मृत्वा॥ करांगन्यासंकुर्यात्॥

स्वाहा हृदयाय नमः इत्यंगुष्ठयोः। सोहं शिरसे स्वाहेति तर्जन्योः। हंसः शिखायै वषट् मध्यमयोः। ह्रीं कवचाय हुमिति नामिकयोः।
ॐ नेत्रत्रयाय वौषट् कनिष्ठयोः। हरिहराय अस्त्राय फट् इति करतलकरपृष्ठाभ्यां नमः। ततो ध्यानम्।। नारदादिपंचमुनि

भिः परिचीयमाने नैरंजनं गम्यमनिरंजं जगदेकमूलं।। सच्चित्सम स्तगमनीश्वरमच्युतं तं तत्तेजः परं जगति सांद्रकृपानिधानं।।
इति सकलप्रपंचातिरिक्तः सर्वसाक्षी सच्चिदानंदस्वरूपः सोहमित्यात्मानं ध्यात्वा।। श्रीमद्दक्षिणकालिकापरमात्मा मनोतं तस्या
नयुतानजुहोमिति बुध्यात्।। संहारक्रमेण प्रथमं न्यस्य सृष्टिक्रमेण पश्चान्न्यसेत्। तद्यथा।। ॐ ह्रीं क्षं हंसः सोहं स्वाहा हृदादि
मुखपर्यंतं इत्यादि। ॐ ह्रीं अं हंसः सोहं स्वाहा इत्यंतं प्रणवभुवनेश्वरीबीजादिकान् हंसः सोहं स्वाहेत्यंतान् मातृकावर्णान् विलोमे
पूर्ववन्न्यसेदिति क्रमः संहारक्रमः। अथ सृष्टिक्रमः। ॐ ह्रीं अं हंसः सोहं स्वाहा ललाटे इत्यादि क्षांतं पूर्ववन्न्यसेदिति सृष्टि
क्रमः। एवं वर्णमयं होमं कृत्वादिव्यतनुर्नरः। प्रजपेत्सकलान्मंत्रान् ततः सिद्धिमवाप्नुयात्।। इति प्रपंचयोगन्यासः।।

न्यस्य मंत्री यथा न्यायं देहविश्वस्य मारतं। जपेन्मंत्रान् भजेद्देवान् यजेदग्निमनन्यधीः। देवो भूत्वा यजेद्देवान् नादेवो देवमर्चयेत्। इति
प्राहः क्रमनिःसारात् ततो विन्यसेद्बुधः। इति कृते धिकृतो भवति ध्रुवं सकलशक्तिमनोजपानादिषु। पवनसंयमनं खमनाचारेय
दिरूजसुमसौमनुमिच्छतीति।। अथ योगपीठन्यासः।। तद्यथा।। असद्द्वयोपकल्पितपादचतुष्टयं मुखनाभिपार्श्वद्वयमध्योपकल्पित
गात्रकं पीठरूपं निजदेहं ध्यात्वा तत्र न्यसेत्। मूलाधारे महाकायाय रक्तवर्णमंडूकाधाराय नमः। तदुपरि स्वाधिष्ठानपर्यंतं ॐ पंचवक्त्राय द
शभुजाय कृष्णवर्णाय महदक्षिणात्मने नमः। कलातत्वात्मनेनमः। विद्यातत्वात्मनेनमः। परतत्वात्मनेनमः। ॐ ह्रीं स्मशानकालिकायै हूं
हूं शवरूपश्मशानशायिने महादेवाय महाप्रेतासनाय नमः। इति विन्यस्य क्षणं देहमये पीठे स्वेष्टदेवतां चिंतयेदिति योगपीठन्यासः। ततादौ
प्राणायामत्रयं कृत्वा ऋष्यादिकरषडंगन्यासं कुर्यात्। यथा। अस्य श्रीद्वाविंशत्यक्षरदक्षिणकालिकायाः श्रीभैरव ऋषिः त्रिष्टुप्छंदः
स्मशानकालिका देवता ह्रीं बीजं हूं शक्तिः क्रीं कीलकं मम चतुर्वर्गसिद्ध्यर्थे जपे विनियोगः। श्रीभैरवऋ० शिरसि त्रिष्टुप्छंदसे नमः मुखे
स्मशानकालिकायै० हृदि। ह्रीं बीजाय गुह्ये। हूं शक्तये० पादयोः। क्रीं कीलकाय० सर्वांगे।। अथ करांगन्यासो कु० पूर्ववत्। ॐ क्रां हृदयाय नमः

श्या० र०
॥१२॥

इत्यंगुष्ठयोरित्यादि पूर्ववत्‌ इति करांगन्यासः॥ अथ वर्णपंजरन्यासः। अं आं ठं नमः हृदये। एं ऐं टं दक्षभुजे। ङं वं नमः वामभुजे। एं तं
भं नमः दक्षजंघायां। मं यं हं क्षं नमः वामजंघायां। ततः प्रणवादिनमोन्तैः अकारादिक्षकारान्तैः। पञ्चाशद्वर्णैर्व्यापकं कृत्वा छोटिका
भिर्दशदिशो बध्नीयादिति वर्णपंजरन्यासः। ततः प्रणवादिनमोन्तेन मूलमंत्रेण शिर आरभ्य आपादं पादमारभ्य मस्तकं सप्त
धा व्यापकत्वेन संन्यास्य समस्तमंगं प्रणवादिनमोन्तेन त्रिधा शोधितं कुर्यादिति व्यापकन्यासः। ततो मूलमंत्रपुटितैरकारादिक्ष
कारान्तैर्मातृकावर्णैः पूर्ववन्मातृकास्थानेषु न्यसेत्। इति मंत्रपुटितन्यासः। ततः पुनः ऋष्यादिकरषडंगन्यासं कृत्वा मुद्राः प्र
दर्शयेत्। पाशांकुशवराखड्गचर्मधनुःशरान्॥ मौशली मुद्रिका दौर्गी मुद्रा शक्तिप्रियंकरीः। इति सामान्योक्तदशमुद्राः। अ
स्याः कापालिका मुद्रा विशेषतः प्रियंकरी। पात्रमेव द्वामहस्ते च कृत्वा वामकरे तथा। विधाय वोच्छ्रितं कुर्यात् मुद्रा कापालिका
स्मृता। इति न्यासजालं समाप्तम्॥ इति श्रीशंकरानंदनाथविरचितायां कालिकाकल्पोक्तभूतशुद्ध्यादिन्यासविधिर्नाम द्विती
योल्लासः॥ अथान्तर्योगो जपविधिश्चोच्यते॥ तत्र मूलेन प्राणायामत्रयं ऋष्यादिकरषडंगन्यासं च विधाय मूलवि

द्ययात्रिर्व्याप्य हृदि देवीं यथोक्तरूपं ध्यायेत्। तत्रादौ महाकालं यजेत्पूर्वं पश्चाद्देवीं प्रपूजयेत्। महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकं॥
बिभ्रतं चैव खट्वांगं दंष्ट्राभीममुखं शिशुं। व्याघ्रचर्मावृतकटिं तुंदिलं रक्तवाससं। त्रिनेत्रमूर्ध्वकेशं च मुंडमालाविभूषितं॥ ज
टाभारलसच्चंद्रखंडमुग्रं ज्वलन्निव॥ एवं ध्यायेन्महाकालं पश्चाद्देवीं विचिंतयेत्। यथा। करालवदनां घोरां मुक्तकेशीं चतु
र्भुजां। कालिकां दक्षिणां दिव्यां मुंडमालाविभूषणां। सद्यश्छिन्नशिरःखड्गवामोर्ध्वाधःकरांबुजां। अभयं वरदं चैव दक्षिणा
धोर्ध्वपाणिकां। महामेघप्रभां श्यामां तथैव च दिगंबरां। कंठावसक्तमुंडालीगलद्रुधिरचर्चितां। कर्णावतंसतानीतशव
युग्मभयानकां। घोरदंष्ट्राकरालास्यां पीनोन्नतपयोधरां। शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम्। सृक्कद्वयगलद्रक्तधा
राविस्फुरिताननां। घोररूपां महारौद्रीं श्मशानालयवासिनीं। दन्तुरां दक्षिणव्यापिमुक्तलम्बकचोच्चयां। शवरूपमहादेवहृदयोपरि
संस्थितां। शिवाभिर्घोररूपाभिश्चतुर्दिक्षु समन्वितां। महाकालेन च सममुपविष्टां स्मरातुरां। सुखप्रसन्नवदनां स्मेराननसरोरुहां॥ ए
वं ध्यात्वा संचिंतयेत्कालीं श्मशानालयवासिनीं। इति ध्यात्वा। अभयकरत्वमुद्रायां षोडशोपचारैः पूजयेत्। तद्यथा। मूलेन प्राणायामत्र

श्रा०र०
१३

मेणब्रह्मरंध्रं निवापरमशिवेनसहसंयोज्य ततः श्वाहवाहनक्रमेणहृदयकल्पितमूर्तीमावाह्य मूलेन। आसनं स्वागतं पाद्यमर्घ्यमाचम
नीयकं। मधुपर्कं वाचमनं तथा स्नानं वस्त्रभूषणं। गंधपुष्पाक्षतं चैव धूपदीपावतः परम्। नैवद्यं तर्पणं चोक्ताउपचारास्तु षोडशाः॥ इति
षोडशोपचारैर्मनुः। कल्पितैः संपूज्य मूलाधारे वह्निमंडलायनमः। इति सम्पूज्य। मूलेन पुण्यं जुहोमि नमः स्वाहा। एवं। पापं जुहोमि नमः स्वा
हा। कृत्यं जुहोमि नमः स्वाहा। अकृत्यं जुहोमि नमः स्वाहा। संकल्पं जुहोमि नमः स्वाहा। विकल्पं जुहोमि नमः स्वाहा। धर्मं जुहोमि नमः स्वाहा।
अधर्मं जुहोमि नमः स्वाहा। अथ प्राणप्रतिष्ठा॥

षं शं षं सं हंसः सोहं मालिन्याः प्राणइह प्राणाः इत्यादि प्राणप्रतिष्ठां विधाय करे धृत्वा मूलं अं मूलं आं इत्यादि मूलं क्षं इ
त्यंतं पुनर्विलोमितं मूलं क्षं मूलं लं इत्यादि मूलं अं इत्यन्तं पुनः मूलं अं १६ मूलं कं ४ मूलं चं ४ मूलं टं ४ मूलं तं ४ मू
लं पं ४ मूलं यं ३ मूलं शं ४ इत्येकैकाक्षपरिवर्तनेनाष्टोत्तरशतं जप्त्वा पट्टकूला विरचित गोमुखे पेऽर्पयानि क्षिप्य दृढ
बध्वानमस्कृत्य गोपयेदिति मालाप्रतिष्ठा। आदौ शापविमोचनं कृत्वा आदावंते च दशवारं जपेत्॥ जपमालामा
दाय वामहस्ते निधाय मूलेनार्घ्योदकेनाभ्युक्ष्य। ओं माले माले महामाले सर्वशक्तिस्वरूपिणी। चतुर्वर्गस्त्वयिन्यस्ता
स्तस्मान्मे सिद्धिदा भवेत्। ह्रीं सिद्ध्यै नमः इति गंधादिभिः संपूज्य। वों अविघ्नं कुरु माले त्वमिति मंत्रेण दक्षि
णहस्तेनादाय शिरसि गुरुं कंठे मंत्रं पीतवर्णं हृदये श्वेष्टदेवं संस्थाप्य तदेकाग्रचित्तो अयुतं सहस्रं वाष्टोत्त
रशतं वा प्रणवमुच्चार्य मूलमंत्रं यथाविधिवत् करमालया वा ततः संख्यापूर्तौ पुनः प्रणवमुच्चार्य ज
पं समाप्य। त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम। शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा। ह्रीं सिद्ध्यै नम

शा० र०
१४

इतिमंत्रेणसामालांशिरसिसंप्राणायामत्रयंकृत्वाहृदयादिकरन्यासविन्यासांतंविधायस्वदक्षिणहस्तेनत्र्यर्घोद
कंगृहीत्वा गुह्यातिगुह्यगोप्त्रीत्वंगृहाणस्मत्कृतंजपं ।सिद्धिर्भवतुमेदेवीत्वत्प्रसादात्वयिस्थित इतिमंत्रेणदेव्या
वामहस्तेसमर्प्यदेव्यैपुष्पांजलिंक्षिपेत् । ततो ।ह्रींसिद्धैनमइत्यनेनपुनर्मालांसम्पूज्य ।शिरसिसंस्थापये
त् इतिअंतर्यागविधिर्नामतृतीयोल्लासः ॥ ० ॥ अथबहिर्यागः ॥ आदौपात्रासादनंकुर्यात् ॥ यथा ॥
साध्यसाधकयोर्मध्येषट्त्रिंशदंगुलंभवेत् । द्वादशांगुलमूर्ध्वञ्च ।अधोभागेतथांगुलं । द्वादशांगुलमध्यस्य
तत्रसंस्थापयेद्बुधः ।स्वार्थेचद्वादशांगुक्ता देवार्थेद्वादशैत्यजेत् । द्वादशांगुलमध्यस्थं तत्रत्र्यर्घंनिधा
पयेत् । आदौसामान्यार्घ्यंस्थापयित्वाकलशंस्थापयेत् । यथा स्ववामाग्रभागेकस्तूरीकुंकुमचंदनकर्पूर
मिश्रितजलेनभूमिंविलिप्य ।तत्रषट्कोणांतर्गतंविंदुत्रिकोणमालिख्य वाह्येवृत्तचतुरस्रंकृत्वासा
मा[illegible]न्यार्घोदकेनाभ्युक्ष्य ॐ ह्रींआधारशक्त्यादिभ्योनमइतिसंपूज्य फडिति घटंप्रक्षाल्यरक्तवस्त्रमा

लादिनाभूषयित्वाओमितिमंत्रेणत्रिपदिकोपरिसंस्थाप्यदेवीबुध्या ।अंद्वादशकलात्मनेसूर्यमंडलायनमइतिघ
टेसंपूज्यमूलांतेस्सं ५० इतिकलशपात्रंपूरयामितिकलशमापूर्यतरक्तचंदनपुष्पादिनिक्षिप्य ।ओंषोडशकलात्मने
चंद्रमंडलायनमइतिसंपूज्य फडितिसंरक्ष्यहुमित्यवगुण्यमूलेनसंवीक्ष्यतेनैवाभ्युक्ष्य ओमितिगंधपुष्पादिनि
क्षिप्यओंषोडशकलात्मने घटेसंपूज्य ।ओवन्हेर्दशकलात्मने घटेसंपूज्य । एकत्वपरंब्रम्हस्थूलसूक्ष्ममयंध्रुवं
कचोद्भवां ब्रम्हहत्यांतेननतेनाशयाम्यहं ।अनेनब्रह्मशापविमोचनं । सूर्यमंडलसंभूतेवरुणालयसंभवे अमा
बीजमयेदेवीशुक्रशापाद्विमुच्यतां ।विदानांप्रणवोबीजंब्रह्मानंदमयंयदि ।तेनसत्येनतेदेवीब्रह्महत्यांव्यपो
हतु । इत्यभिमंत्रयेत् । ॐ शांशींशूंशैंशौंशः ।शुक्रशापविमोचितायैसुरादेव्यैनमइतिद्वादशधाजपेत् । ॐ बांबींबूं
बैंबौंबः ब्रह्मशापविमोचितायैसुरादेव्यैनमइतिदशधाजपेत् ।ॐ क्रांक्रींक्रूंक्रैंक्रौंक्रः ।सुरेकृष्णशापविमोच
य२ अमृतंश्रावय२ स्वाहेतिद्वादशधाजपेत् । पावमानःपरानंदः पावमानःपरोरसः पवमानपरंज्ञानंतेननतेपावया

श्या०र० १५ म्यहमितिजप्त्वा। हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जागोजा ऋतजा अद्रिजा ऋतं बृह

दिति द्रव्योपरि वारत्रयं पठेत्। ततः आनंदभैरवानंदभैरव्यौ ध्यायेत्। सूर्यकोटिप्रतिकाशं चंद्रकोटिसुशीतलं। अष्टा

दशभुजं देवं पंचवक्त्रं त्रिलोचनं। अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरि स्थितम्। वृषारूढं नीलकंठं सर्वाभरणभूषि

३४ तं। कपालखट्वांगधरं घंटाडमरुवादिनम्॥ पाशांकुशधरं देवं गदामुसलधारिणं खड्गखेटकपट्टीशमुद्गरशूलकुंतकं॥

विचित्रखेटकं मुंडवरदाभयपाणिकं। लोहितं देवदेवेशं भावयेत्साधकोत्तमः। एवं ध्यात्वा॥ हसक्षमलवरयूं

ॐ आनंदभैरवाय वषट्। इत्यानंदभैरवं त्रिः पूजयेत्। भावयेच्च सुरादे[vi] चंद्रकोट्ययुतप्रभां

हिमकुंदेंदुधवलां पंचवक्त्रां त्रिलोचनां। अष्टादशभुजैर्युक्तां सर्वानंदकरोद्यतां। प्रहसंतीं विशा

लाक्षीं देवदेवस्य सन्मुखीम्॥ एवं ध्यात्वा। सहक्षमलवरयीं सुरादेव्यै वौषट्। इत्यानंद[भैरवीं] भैरवीं त्रिः संपूज्य

द्रव्यमध्ये त्रिकोणं विलिख्य। ततः उत्तरकोणपर्यंतं ककारादि अकारादि अकारांतं १६ ततः ककारादि

ततः पश्चिमकोण

नकारांतं विलिख्य मध्ये हं लक्षं पर्यंतं थकारादि १६ सकारांतं विलिख्य मध्ये हं लक्षं विलिख्य। ततः कुंडलिनीमु

त्थाप्य शिवेन संयोज्य तद्गलितामृतधारां वहन्नासापुटेन द्रव्यमध्ये पतितां ध्यात्वा धेनुमुद्रया अमृतीकृत्य

ॐ अमृते ऽमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतमाकर्षयाकर्षय अमृतं स्रावय २ स्वाहा वमिति वरुणबीजं मू

लं च घटे धृत्वाऽष्टधा जपेत् इति द्रव्यशुद्धिः इति कलशविधिः। अथ विशेषार्घ्यः। आत्मश्रीचक्रयोर्मध्ये त्रिको

णवृत्तषट्कोणचतुरस्रं मंडलं विधाय मध्ये इति ति विलिख्य। चतुरस्रकोणे ॐ उड्डानगिरिपीठाय नम इति

प्रादक्षिण्येन वा ॐ पूर्णगिरिपीठाय०। ॐ जालंधरपीठाय०। ॐ कामरूपीठाय०। षट्कोणे षडंगानि सं

पूज्य त्रिकोणं मूलखंडत्रयेण सम्पूज्य मध्ये ॐ ह्रीं आधारशक्त्येन नमः तत्राधारे संस्थाप्य नम इति सामा

नार्घोदके संप्रोक्ष्य यं दशकलात्मने वह्निमंडलाय नमः। यं धूम्रार्चिषे नमः। रं उष्मायै० लं ज्वलिन्यै० वं ज्वालि

न्यै० शं विस्फुलिंगिन्यै० षं सुश्रियै० सं सुरूपायै० हं कपिलायै० लं हव्यवहायै० क्षं कव्यवहायै० इति संपूज्य फडि

तिपात्रं प्रक्षाल्य श्रीमद्दक्षिणकालिकाअर्घ्यपात्रं संस्थाप्य इति स्थाप्य। अं द्वादशकलात्मने सूर्यमंडलाय अर्घ्यपात्रा
य नमः कं भं तपिन्यै· खं बं तापिन्यै· गं फं धूम्रायै घं पं मरिच्यै· ङं नं ज्वालिन्यै· चं धं रुच्यै· छं दं सुषुम्णायै· जं थं भोग
दायै० झं तं विश्वायै· ञं णं वोधिन्यै· टं ढं धारिण्यै· ठं डं क्षमायै· नम इति संपूज्य मूलं ५० इति पठन् विशेषार्घपात्रं
पूरयामीति घठस्य कारणामृतेन त्रिभागं प्रपूर्य जलेन भागमेकं पूरयेत् । तत्र दूर्वाक्षतरक्तचंदनपुष्पबिल्वपत्र
नानासुगंधिद्रव्यं निक्षिप्य । ॐ षोडशकलात्मने चंद्रमंडलाय नमः । अं अमृतायै० आं मानदायै० इं पूषायै० ईं तु
ष्ट्यै० उं पुष्ट्यै० । ऊं रत्यै० । ऋं धृत्यै० । ॠं शशिन्यै० ८ ऌं चंद्रिकायै० ९ ॡं कांत्यै० १० एं ज्योत्स्नायै ११ ऐं श्रियै १२
ॐ प्रीत्यै० १३ औं अंगदायै० १४ अं पूर्णायै० १५ अः पूर्णामृतायै नमः इति संपूज्य त्रिकोणवृत्तषट्कोणकार
णमध्ये कुशेन विलिख्य त्रिकोणरेखायां पूर्ववत् । अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः इति पश्चिमको
णादारभ्य दक्षिणकोणपर्यंतं कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं इति उत्तरकोणपर्यंतं । थं दं धं नं पं फं बं भं मं

यं रं लं वं शं षं सं पुनः पश्चिमकोणपर्यंतं हं लं क्षं मध्ये लिखेत् । मूलखंडत्रयेण त्रिकोणं संपूज्य । गंगे चेति मंत्रेण अं
कुशमुद्रया सूर्यमंडलात् तीर्थान्यावाह्य आनंदभैरवानंदभैरव्यौ तत्तन्मंत्रेण पूजयेत् । ततः पूर्वादिक्रमेण पंचरत्ना
य नमः । म्लूं मृत्यरत्नाय० । न्लूं नागरत्नाय० २ ततो द्रव्यमध्ये मांसमीनमुद्राकुंडगोलादिकं च शोध्य निक्षिपेत् ॥
त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् । ऐं पशुपाशाय विद्महे शि
रश्छेदाय धीमही तन्नो मांसः प्रचोदयात् इति मांसं संशोध्य । प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरि
ष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा । ऐं जलचराय विद्महे क्लीं मत्स्यजालाय धीमही सौः
तन्नो मीनः प्रचोदयात् । अनेन मीनान्संशोध्य । तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततम् । अनेन
मुद्रां संशोध्य । ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं देहि
सिनीबाली गर्भं देहि सरस्वती गर्भं ते अश्विना देवावधत्तां पुष्करस्रजौ प्लूं ज्लूं ग्लूं स्वाहा अमृते ऽमृतोद्भवे ऽमृतवर्षिणि

श्या०र०
१८

अमृतं त्वावय २ स्वाहा अनेन कुंडादिसंशोध्य विशेषार्घ्ये निक्षिपेत् । एतदभावे अनुकल्पं निक्षिपेत् । लवणार्द्रक पिण्याक
गोधूमं मांस पंचमं । लसुनं च महादेवि मांसप्रतिनिधो स्मृतं ॥ ततः सर्वं द्रुमिति अवगुंठ्य धेनुमुद्रयामृतीकृत्य ना
लत्रयं दिग्बंधनं कृत्वा । ऐं क्लीं सौः ब्रह्मांडखंड संभूते मशेषरस संभवं । आपूरितं महापात्रे पीयूषं रसमाव
हं । अखंडैक रसानंदकरे वसुधात्मनि । स्वच्छंद स्फुरणं चात्र निधेह्युकुल रूपिणी । क्लीं कुल स्यामृताका
रे शुद्ध ज्ञानकरे वरे । अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लीन्न रूपिणि । भूत्वा परामृताकारं मयि विस्फुरणं
कुरु । एतैरर्घ्यैकारणामामन्त्र्यं । तन्मध्ये कामकालां विलिख्य । तत्रेष्टदेवतामावाह्य । योनिमुद्रां प्रदर्श्य
नमः इति संपूज्य शंखमुद्रां प्रदर्श्य । षडंगेन सकलीकृत्य । मत्स्यमुद्रया पात्रमाच्छाद्य मूलं दशधा प्रजप्य देवीस्व
रूपं पात्रं विभावयेदिति । विशेषार्घ्यस्थापनं । पूजापर्यंतं पात्रं न चालयेत् । ततो देव्याज्ञां गृहीत्वा घटश्रीपात्रयोर्म
ध्ये पात्राणि स्थापयेत् । यथा । प्रथम सामान्यार्घ्यः ततो घटः ततः श्रीपात्रं २ घटसमीपे गुरुपात्रं ३ भैरवपात्रं ४

ततो वीरपात्रं ५ शक्तिपात्रं ६ योगिनीपात्रं ७ देवतापात्रं ८ बलिपात्रं ९ स्वपात्रं १० पाद्यपात्रं ११ आचमनपात्रं १२
मधुपर्कपात्रं १३ स्नानपात्रं १४ एवं क्रमेण सामान्यार्घ्यवत्सर्वाणि पात्राणि स्थापयेत् । ततो मीनमांसयुतकार
णेन तत्त्वमुद्रया श्रीपात्रात्त्वमृद्धिं श्री आनंदभैरवं तर्पयामीति तिन्मंत्रेण त्रिः संतर्प्य तथैवानंदभैरवीं त्रिसंत
र्प्य ऐं ह्रीं श्रीं अमुकानंदनाथ श्रीपादुकां पूजयामि तर्पयामीति त्रिः सकृद्वा संतर्पयेदिति । ततस्तत्त्वशुद्धिं कुर्यात्
यथा । प्राणापानव्यानोदानानि शुध्यंतां । ज्योतिरहं विरजो विपाप्मा भूयासं स्वाहा १ ॐ पृथिव्यापस्तेजोवाय्वाकाशानि म्भा
श्रोत्र्यप.. भावे मे शुध्यंतामित्यादि २ ॐ प्रकृत्यहंकारबुद्धिमनः श्रोत्राणि शुध्यंतामित्यादि ३ ॐ त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे शु
८ ध्यंतामित्यादि ४ ॐ पाणिपादपायूपस्थशब्दमि शुध्यंतामित्यादि ५ ॐ स्पर्शरूपरसगंधाकाशानि मे शुध्यंता
मित्यादि ६ ॐ वायुतेजः सलिलभूम्यात्मनो शुध्यंतामित्यादि ७ इति सप्तमंत्रैर्देहं संशोध्य । कारणेन करतलं समा
र्ज्य दक्षहस्ते त्रिकोणं विलिख्य तत्शुद्धखंडान् त्रिकोणाग्रदक्षोत्तरमध्ये पुनिधाय । वामहस्तांगुष्ठमध्यमानामारेकां

श्या०र
१८

गृहीत्वामूलमंत्रां ऐं ह्रीं श्रीं आत्मतत्वेन स्थूलदेहं शोधयामि स्वाहा ।अनेन अधस्थां स्वीकृत्या मूल ह्रीं श्रीं विद्यातत्वे
न सूक्ष्मदेहं शो० ति उत्तरस्थां स्वीकृत्य । मूले ह्रीं श्रीं शिवतत्वेन परमदेहं श्रयंजीवं शो० ति मध्यस्थां स्वीकृत्य । वस्त्रे
णहस्तौ संशोध्यं हस्ताभ्यां सर्वांगे संमार्जयन् सं मंत्रं पठेदिति तत्वशुद्धिः । ततो मूलाधारात्कुंडलिनीं रूपां स्वेष्टदेव
तास्वजिह्वाग्रे समानीय तन्मुखे स्वपात्रह्विं दुं स्वीकुर्यात् ।अनेन आर्द्रं ज्वलति ज्योतिरहमस्मि अहमेव हिमां जुहो
मि स्वाहा ।। ततः श्रीपात्रामृतेन पूजोपकरणमात्मानं च संप्रोक्ष्य सर्वं ब्रह्ममयं भावयेदिति । ततश्चक्रस्य पूर्वदक्षि
णपश्चिमोत्तरेषु त्रिकोणवृत्तमंडलानि विलिख्य । ऐं ह्रीं मंडलायनमः इति मंडलानि संपूज्य । पूर्वे बां बटुकायनमः इति सं
पूज्य पात्रे अन्नपूर्णं सलिलमीनमांसपुष्पैर्बलिमुपहृत्य बलिपात्रस्थ कोणे न वामहस्त तत्वमुद्रया उत्सृजेदनेन मंत्रेण
एह्येहि देविपुत्र बटुकनाथ कपिलजटाभास्वर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय २ सर्वोपचारसहितं बलिं गृ
ह्ण २ स्वाहा । एष बलिर्बटुकायनमः । ततो दक्षिणे । हुं यां योगिनीभ्यो नमः इति संपूज्य दक्षांगुष्ठानामिकाभ्यां पू

र्ववद्बलिं दद्यात् । तेन ऊर्ध्वं ब्रह्माउनो वादिविगगनतले भूतले निष्कले वा पाताले वानले वा सलिलपवनयोर्यत्र कुत्रस्थिता
वा । क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्रीता देव्यः सदा नः शुभबलिविधिना पातु वीरेंद्रवंद्याः । हुं यां ।
योगिनीभ्यः स्वाहा सर्वयोगिनीः फट् स्वाहा । एष बलिर्योगिनीभ्यो नमः । ततः पश्चिमे क्षां क्षेत्रपालायनमः इति
संपूज्य वाममुष्टिकृते दीर्घया तर्जन्या बलिं दद्यादनेन क्षां क्षीं क्षूं क्षैं क्षौं क्षः । क्षेत्रपाल धूपदीपादिसहितं बलिं गृ
ह्ण २ स्वाहा । एष बलिः क्षेत्रपालायनमः । ततउत्तरे गं गणपतये नमः । इति संपूज्य दक्षहस्तदंडाकारसर्वांगुलिम
ध्यवद्द्वया बलिं दद्यात् । गां गीं गूं गैं गौं गः गणपते वरद २ सर्वजनं मे वशमानय बलिं गृह्ण २ स्वाहा । एष बलिर्गण
पतयेनमः । अथ स्ववामे पूर्ववन्मंडलं कृत्वा ऐं ह्रीं श्रीं व्यापकमंडलायनमः इति संपूज्य । तत्र साधारं बलिं संस्था
प्य मूलेन गंधपुष्पधूपदीपानातं संपूज्य । ॐ श्रीं ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा । एष बलिः सर्व
भूतेभ्यो नमः इति तत्वमुद्रया निवेदयेत् । अशक्तश्चेत्सर्वभूताय बलिमेकं दद्यात् । ततः पूर्ववत्प्राणायामं षडंगं च

२ श्यामा० र
१८

कृत्वात्मानं कामकलारूपं विभाव्य। तेजोमणिरचितपीठोपरि वस्त्राण्यास्तीर्य तत्र सुवर्णादिनिर्मितं श्रीचक्रं प्राणप्रतिष्ठादि
संस्कृतं संस्थाप्य पीठन्यासोक्तविधिना पीठपूजां विधाय। अरुणार्कसमप्रभं कुसुमांजलिं कूर्ममुद्रया गृहीत्वा मूलाधारात्कुं
डलिनीमुत्थाप्य सुषुम्णामार्गेण शिरसि सहस्रदलकमलकर्णिकायां परमसदाशिवेन संयोज्य तत्सामरस्यं तेजोरूपं
प्रदीपकलिकाकारं हृदष्टदलपीठे समानीय मूलेन मूर्त्तिं संचिंत्य श्रीचक्रे समावाहयेत्। तद्यथा। देवेशि भक्तिसुलभे प
रिवारसमन्विते। यावत्त्वां पूजयिष्यामि तावद्देवी स्थिरा भवेत्। यंत्रे निधाय। आवाहनमुद्रया। मूलं महाकालसहिते
श्रीदक्षिणकालिके इहागच्छ त्यावाह्य। मूलं महा० इह तिष्ठ तिष्ठेति संस्थाप्य। मूलं महा० इह सन्निधेहि। मूलं महा० इह संनिरु
ध्यस्व। मूलं महा० इह सन्मुखी भव। मूलं महा० अमृतीकृता भव। मूलं महा० परमीकृता भवेति। तत्तन्मुद्रां प्रदर्श्य। पूर्वो
क्तप्राणप्रतिष्ठामंत्रेण लेलिहामुद्रया प्राणान्प्रतिष्ठाप्य। ततो योनिखड्गमुंडवराभीतिपरयोनिमुद्राः प्रदर्श्य। ततस्या
नेष्वतास्ताः शक्तिरश्मिवृंदरूपा विभावयेत्। तथा तंत्रार्णवे होतुः पूर्वं पूर्वभागं प्रदिष्टं। सव्यभागं दक्षिणं त्वागमज्ञैः वधि

धाकुन्तरं भागमग्न्यं प्रशस्तावद्भिः पश्चिमं भागमुक्तमित्यादिरीत्यादिकल्पनं कृत्वा पूजयेत्। ततो मूलमुच्चार्य महाकालसहिते
